# १८. अष्टापदमहातीर्थकल्पः ।

[श्रीधर्मघोषसूरिकृतः ।]

वरधर्मकीर्तिऋषभो[1] विद्यानन्दाश्रितः पवित्रितवान् ।
देवेन्द्रवन्दितो यः स जयत्यष्टापदगिरीशः ॥ १ ॥

यस्मिन्नष्टापदभूदष्टापदमुख्यदोषलक्षहरः । अष्टापदाभ [2]ऋषभः स जयत्यष्टापदगिरीशः ॥ २ ॥
**ऋषभ**सुता नवनवति**र्बाहुबलि**प्रभृतयः प्रवरयतयः । यस्मिन्नभजन्नमृतं स जयत्यष्टापदगिरीशः ॥ ३ ॥
अयुजन्निर्वृतियोगं[3] वियोगभीरव इव प्रभोः समकम् । यत्रर्षिदशसहस्राः स जयत्यष्टापदगिरीशः ॥ ४ ॥
यत्राष्टपुत्रपुत्रा युगपद्वृषभेण[4] नवनवतिपुत्राः । समयैकेन शिवमगुः स जयत्यष्टापदगिरीशः ॥ ५ ॥
रत्नत्रयमिव मूर्तं स्तूपत्रितयं चितित्रयस्थाने । यत्रास्थापयदिन्द्रः स जयत्यष्टापदगिरीशः ॥ ६ ॥
सिद्धायतनप्रतिमं सिंहनिषद्येति यत्र सुचतुर्द्वा । **भरतो**ऽरचयच्चैत्यं स जयत्यष्टापदगिरीशः ॥ ७ ॥
यत्र विराजति चैत्यं योजनदीर्घं तदर्धपृथुमानम् । क्रोशत्रयोच्चमुच्चैः[5] स जयत्यष्टापदगिरीशः ॥ ८ ॥
यत्र भ्रातृप्रतिमा [6]व्यधाच्चतुर्विंशति[7]जिनप्रतिमाः । भरतः सात्मप्रतिमाः स जयत्यष्टापदगिरीशः ॥ ९ ॥
[8]स्वस्वाकृतिमितिवर्णाङ्कवर्णितान् वर्तमानजिनबिम्बान् । भरतो वर्णितवानिह स जयत्यष्टापदगिरीशः ॥ १० ॥
सप्रतिमान्नवनवतिं बन्धुस्तूपांस्तथार्हतस्तूपम् । यत्रारचयच्चक्री स जयत्यष्टापदगिरीशः ॥ ११ ॥
भरतेन मोहसिंहं हन्तुमिवाष्टापदः कृताष्टपदः । शुशुभेऽष्टयोजनो यः स जयत्यष्टापदगिरीशः ॥ १२ ॥
यस्मिन्ननेककोट्यो महर्षयो भरतचक्रवर्त्याद्याः । सिद्धिं साधितवन्तः स जयत्यष्टापदगिरीशः ॥ १३ ॥
**सगर**सुताग्रे सर्वार्थ-शिवगतीन् भरतराजवंशर्षीन् । यत्र **सुबुद्धि**रकथयत्स जयत्यष्टापदगिरीशः ॥ १४ ॥
परिखासागरमकरन्त **सागराः** सागराशया यत्र । परितो रक्षति कृतये स जयत्यष्टापदगिरीशः ॥ १५ ॥
क्षालयितुमिव स्वैनो जैनो[9] यो गंगयाश्रितः परितः । सन्ततमुल्लोलकरैः स जयत्यष्टापदगिरीशः ॥ १६ ॥
यत्र जिनतिलकदानाद् **दमयन्त्य**पि [10]कृतानुरूपफलम् । भालस्वभावतिलकं स जयत्यष्टापदगिरीशः ॥ १७ ॥
यमकूपारे कोपात् क्षिपन्नलं **बालिनां**ह्रिणाऽऽक्रम्य । आरावि **रावणो**ऽरं स जयत्यष्टापदगिरीशः ॥ १८ ॥
भुजतन्त्र्या जिनमहकृल्लङ्केन्द्रोऽवाप यत्र **धरणेन्द्रात्** । विजयामोघां शक्तिं स जयत्यष्टापदगिरीशः ॥ १९ ॥
[11]चतुरश्चतुरोऽष्टदश द्वौ चापाच्यादिदिक्षु जिनबिम्बान् । यत्रावन्दत [12]गणभृत् स जयत्यष्टापदगिरीशः ॥ २० ॥
अचलेऽत्रोदयमचलं स्वशक्तिवन्दितजिनो जनो[13] लभते । **वीरो**ऽवर्णयदिति यं स जयत्यष्टापदगिरीशः ॥ २१ ॥
प्रभुभणितपुण्डरीकाध्ययनाध्ययनात् सुरोऽत्र दशमोऽभूत् । दशपूर्वि**पुण्डरीकः** स जयत्यष्टापदगिरीशः ॥ २२ ॥
यत्र [14]स्तुतजिननाथोऽदीक्षित तापसशतानि पञ्चदश । श्री**गौतम**गणनाथः स जयत्यष्टापदगिरीशः ॥ २३ ॥
इत्यष्टापदपर्वत इव योऽष्टापदमयश्चिरस्थायी । व्यावर्णि महातीर्थं स जयत्यष्टापदगिरीशः ॥ २४ ॥

**॥ इति श्रीअष्टापदमहातीर्थकल्पः समाप्तः । कृतिरियं श्रीधर्मघोषसूरीणाम् ॥**

॥ ग्रं० ३०, अ० २२ ॥

---

1 C Pb °कीर्तिर्ऋषभो । 2 C Pa °पदा ऋषभः । 3 Pb योग्यं । 4 Pb °पदृषभेण । 5 Pa °त्रयोर्द्धमुच्चैः । 6 B न्यधाच्च° । 7 B C Pa चतुर्विंशतिं । 8 C स्वस्वा° । 9 Pa जैनं । 10 A B क्षतानु° । 11 C चतुश्चतुरो° । 12 B गुणभृत् । 13 B Pb जिनो । 14 C स्तुजिन° ।